# आनन्दोपनिषद्



# જ્ઞાન
# આનંદ

न्यायविशारद-न्यायाचार्य-

**महोपाध्यायश्रीयशोविजयगणिवरविरचित-**

ज्ञानसारान्तर्गतज्ञानाष्टके नूतनवृत्तिरूपा

# आनन्दोपनिषद्

**• नवसर्जनम् - सम्पादनम् •**

प्राचीनश्रुतोद्धारक

**प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः**

**प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः**

**प्रकाशकः**

श्री जिनशासन आराधना ट्रस्ट

મૂળ કૃતિ : **જ્ઞાનસાર અંતર્ગત જ્ઞાનાષ્ટક**

મૂળ કૃતિકાર : ન્યાયવિશારદ ન્યાયાચાર્ય
મહોપાધ્યાય **શ્રીયશોવિજયજી**
ગણિવર્ય

નવનિર્મિત સંસ્કૃત વૃત્તિ : **આનંદોપનિષદ્**

નવસર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિષય : **જ્ઞાનાનંદ**

વિશેષતા : જ્ઞાનની ગરવી દશાની અનુભૂતિ
આનંદનું એક માત્ર રહસ્ય
અધ્યાત્મવિશ્વનું અનુપમ અમૃત.

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

# આચમન આનંદનું

નક્કર આનંદ
નિત્ય આનંદ
પરમ આનંદ
અનુપમ આનંદ
અને
અદ્‌ભુત આનંદ
જે પણ છે
એ જ્ઞાનનો પર્યાય છે.

આપણે આચમન લઈએ
આસ્વાદ લઈએ
આકંઠ લઈએ અને
આસામી થઈ જઈએ.

– આ. કલ્યાણબોધિસૂરિ

# आनन्दोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्य-
मानन्दसत्कं कथये रहस्यम्॥

इह हि संसारोदरवर्त्तिनः सर्वेऽपि सत्त्वाः सन्ततमप्यानन्दमेवाभिलषन्तोऽपि तदुपनिषदनभिज्ञतया तदनुपाये प्रवर्त्तमाना आर्त्तिमेवाऽऽप्नुवन्तीत्यतः परमः कारु-

णिकः प्रकरणकारो ज्ञानमेवाऽऽनन्दोपनिषत्तया प्रमाणयितुमिच्छुस्तन्महिमानमेव सप्रतिपक्षमुपन्यस्यन्नाह-

**मज्जत्यज्ञः किलाज्ञाने**
**विष्टायामिव शूकरः।**
**ज्ञानी निमज्जति ज्ञाने**
**मराल इव मानसे॥१॥**

**अज्ञः** - कुत्सितावगमकलङ्कितः, ज्ञेयविपर्यासमात्रग्राहकत्वात्, **अज्ञाने** - प्रकृत्यशुचिस्त्रीशरीरादिगोचरसौन्दर्यादिमतिलक्षणविपर्यासातिशये, **मज्जति** - मिथ्यात्वमोहोदयवशोपनीतावगाहनविडम्बना-

विषयीभवति। अत्रार्थे दृष्टान्तमाह- **शूकरः** कुत्सिततमः पशुविशेषः, विष्टायामिव- वर्चोविसरात्मकामेध्यतममध्य इव। प्रतीत- मेतत् प्राकृतानामपि यथा विष्टायां मज्जति शूकरः, लुठति सर्वात्मनाऽपि तदशुचौ, खादिति पिबति च तदेव यदशक्यं विचार- यितुमपि शुचिभिः। एवमेव विवेक- विकलत्वादज्ञोऽपि मज्जत्यज्ञाने। दृष्टान्त- साधर्म्यमत्रामेध्यतमत्वादज्ञानस्य तद्रतानां शूकरसङ्काशताऽनपायात्।

स्त्रीधनशरीराद्यप्यज्ञानम्, तद्धेतुत्वा- त्तस्य। भवति हि हेतौ फलव्यपदेशः।

॥ ३ ॥

घृतमायुरिति यथा। मज्जत्यप्राज्ञः, तत्त्वादेव एतदेवाज्ञस्याज्ञत्वं यदज्ञानमज्जनम्। सर्वानर्थमूलं ह्यज्ञानम्। न च - जे आसवा ते परिसवा- इत्याद्यागमादुक्तमज्ञानमपि ज्ञानं स्यादिति वाच्यम्, अज्ञाधिकारस्य प्रस्तुतत्वात्, तमधिकृत्य च स्त्र्यादेरज्ञानमात्रत्वात्।

नन्वेवं ज्ञानिनं प्रतीत्य स्त्र्यादेरपि ज्ञानत्वापत्तिरिति चेत् ? सेयमिष्टपत्तिरेव, स्त्रीगोचराशुच्यादिभावनाविभावनपराणामनन्तानां कैवल्यप्राप्तेरन्यथाऽनुपपत्तेः। अज्ञानिनस्तु तस्यां लावण्यसारं प्रपश्यतोऽज्ञानत्वेनैव सा

परिणमतीति न किञ्चिदनुपपन्नम्। अतो विष्टास्थानीयं सर्वमपि स्त्र्यादि वस्त्वज्ञस्य। यत्राऽसावाऽऽसक्तो भवति। स्वरूपतस्तु न ज्ञानमज्ञानं वा बाह्यं वस्तु, तस्याऽऽध्यात्मिकत्वात्, शुद्धाशुद्धाऽऽत्मपरिणामरूपत्वात्तयोः। अशुद्धपरिणामे मज्जत्यज्ञानी विष्टोपमे। इतरश्चेतरस्मिन्नित्याह- **ज्ञानी** - चिन्मात्रचिन्तामणिस्वरूपाऽऽनन्दैकोपनिषदुपनिषण्णः, **ज्ञाने** - त्रैलोक्यैकसारभूतस्वभावरमणताप्रसूतसौख्ये, **निमज्जति**- ज्ञाताऽऽस्वादतयाऽविरलावगाहनैकलम्पटो भवति। अत्रार्थ उदाहरणमाह- **मानसे** -

सर्वसरःश्रीप्रतिमोषके स्वनामख्याते सरोवरे, **मराल इव** - राजहंसवत्। यथैव राजहंस उत्तमजातित्वेन न पल्वलादिष्वपि रज्यति, आस्तां नगरनिर्धमनादौ, एवं ज्ञान्यपि सर्वाज्ञानपरिहारपुरस्सरं ज्ञानमात्रावगाहनैकदुर्ललितो भवति, दुस्त्यजत्वादनुभूतज्ञानामृताऽऽस्वादस्य, अन्वाहज्ञानामृतरसो येन सकृदास्वादितो भवेत्। स सर्वकार्यमुत्सृज्य तत्रैव परिधावति- इति **(जाबालदर्शनोपनिषद्)**।

स्वरूपं हि ज्ञानिनो ज्ञानम्। अतोऽसौ परमार्थवित्तया स्वरूप एव निमज्जति।

परभावस्पर्शमात्रस्यापि दुःखशतसहस्रस-न्ततिसवितृतया तन्निमज्जनविमर्शमात्रस्यापि ज्ञानिनोऽसम्भवात्, तद्भावानुभावात्। एतदेव ज्ञानिनो ज्ञानित्वं यज्ज्ञानादन्य-त्राननुरक्तिरित्याशयः।

अथाज्ञानित्वमेवेदमस्मदभिप्रायेण, यत्सर्वेन्द्रियप्रह्लादप्रदविषयवैमुख्येन ज्ञान-मात्रेऽनुरक्तिः, ज्ञानिभिस्तु तदर्थं प्राणा-नामपि तृणाधरीकरणात्, यथोक्तम्- युष्म-त्कृते खञ्जनमञ्जुलाक्षि शिरो मदीयं यदि याति यातु। नीतानि नाशं जनकात्मजार्थं दशाननेनापि दशाननानि इति। सारग्रहणं हि

ज्ञानिलिङ्गम्। सारं च त्रैलोक्येऽप्येतदेव, तथा चाप्तप्रवादः- लोके सारो देशो देशे पुरं पुरे तथा सौधः। सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् - इति। एवञ्च सूक्तमेवोक्तसूत्रम्, किन्त्वस्मत्परिभाषित-परिभाषयैव, सारपरिहारपरस्य स्वत एवाज्ञत्वसिद्धेरिति।

मैवम्, अल्पतुच्छाऽऽभिमानिक-सौख्यार्थं बहुतीक्ष्णदुःखविपाकमपश्यतो ज्ञानित्वायोगात्, तत्तद्विपाकोऽपि लोक-सिद्धः, यथा - सत्यं जना वच्मि न पक्ष-पाता - ल्लोकेषु सर्वेष्वपि तथ्यमेतत्।

नान्यन्मनोहारि नितम्बिनीभ्यो दुःखैकहेतुर्न हि कश्चिदन्यः - इति। प्रत्यक्षसिद्धोऽपि, तद्यथा- दर्शने हरते चित्तं स्पर्शने हरते बलम्। सङ्गमे हरते वीर्यं नारी प्रत्यक्षराक्षसी - इति। आगमसिद्धोऽपि, तद्यथा - तम्हा उ वज्जए इत्थी विसलित्तं कंटगं व णच्चा- इति। उपमासिद्धोऽपि, यथोक्तम्- सोअसरी दुरियदरी कवडकुडी महिलिया किलेसकरी। वइरविरोयणअरणी दुक्खखणी सुक्खपडिवक्खा - इति। इतिहाससिद्धोऽपि, यथा - सीअं च उण्हं च सहंति मूढा इत्थीसु सत्ता अविवेअवंता। इलाइ-

पुत्तं व चयंति जाइं जीयं च नासंति य रावणु व्व- इति। अत एवोक्तं केनचित् - उब्भेउं अंगुलिं सो पुरिसो सयलम्मि जीवलोयंमि। कामंतएण नारीं जेण न पत्ताइं दुक्खाइं - इति।

नात्रास्माकमपि विप्रतिपत्तिर्यत् सार-परिहर्त्तुरज्ञता। असारतमा तु योषिदिति प्रतिपत्तव्यम्। ज्ञानमेव च सारम्, तद्धेतुश्च गुर्वादिः। अतस्तदेकानुरक्तस्याबाधितमेव ज्ञानित्वम्।

नन्वेवमप्यस्खलिता स्खलना, अस-ङ्गत्यनपायात्, निमज्जतीति क्रियाया

प्राक्कालीनज्ञानपार्थक्यप्रदर्शकत्वात्, तथा चाज्ञान्येव ज्ञाने निमज्जतीत्यापतितम्, तच्चानिष्टम्। न च प्रागपि निमग्न एवासौ, ततश्च ज्ञानित्वमेवास्य पूर्वमपीति वाच्यम्, प्रागुन्मग्नस्यैव निमज्जनसम्भवात्, तथादर्शनात्, नाप्याकालं ज्ञाननिमग्नो भवति ज्ञानीत्यर्थपरताऽस्य बोध्येति वाच्यम्, तथातात्पर्यव्यञ्जकानुपलब्धेः। न चैवमपि प्रतिपत्तव्यं तदिति वाच्यम्, अतिप्रसङ्गात्, स्वच्छन्दमन्यान्यार्थपरकत्वस्य वक्तुमपि शक्यत्वात्। न च - सो समणो पव्वइओ- इत्यादिवच्छुद्धनयाभिप्रायो-

ऽयम्, तथा च - पलालं न दहत्यग्नि - र्भिद्यते न घटः क्वचित्। नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति - इत्येवं प्रकृतेऽपि नाज्ञानिनो ज्ञाननिमज्जनमपि तु ज्ञानिन एवेति न किञ्चिदनुपपन्नमिति वाच्यम्, तथात्वे त्वितरनयाभिप्रायतोऽ-ज्ञानिनो ज्ञाननिमज्जनमित्येवाऽऽपतितम्, तदभिप्रायेणासंयतस्यैव प्रव्रज्याप्रतिपत्तेः। इत्थञ्च वज्रलेपायते प्रागुक्तदोषानुषङ्गः। ततः सर्वथाऽपि विसंस्थुलतया स्थितमिदं वच इति चेत् ?

न, तात्पर्यानवगमात्। ज्ञानी हि ज्ञानानुरक्ततया सन्ततमप्यपरापरतत्त्वबोधानुगुणक्रिय आस्ते। प्रतिक्षणं परिशीलयति नवीनतरं श्रुतम्। भजते च प्रत्यग्रतरं संवेगरसामृतम्। एवञ्च सन्ततमपि ज्ञाननिमज्जनक्रियासद्भावान्न वर्तमाननिर्देशानुपपत्तिः, नाऽपि प्राक्कालेऽज्ञत्वम्, अभिहितं च - जह जह सुअमवगाहइ अइसयरसपसरसंजुत्तं। तह तह पल्हाइ मुणी नव नवसंवेगसब्भावं - इति।

ननु छद्मस्थज्ञानिनं प्रतीत्यैव घटाकोटिमाटीकते प्रस्तुतोत्तरम्, न तु केवलि-

नमाश्रित्य, नवनवश्रुतावगाहनस्यास्याभावादिति चेत् ? सत्यम्, किन्तु न तत्राप्यसङ्गतिमङ्गति ज्ञाननिमज्जनक्रिया, प्रतिसमयमभिनवस्यैव ज्ञानपर्यायस्योत्पादात्पर्यायनयाभिप्रायेण। तत्र च निमज्जति केवलज्ञान्यपीति सर्वमवदातम्।

किञ्चैतत्क्रियाभिधानेन निर्दिष्टमेतत्, यथा ज्ञानिनाऽपि कर्त्तव्यमेव नूत्ननूत्नश्रुतावगाहने पुरुषार्थः, अन्यथा तज्ज्ञानित्वस्यैवानुपपत्तेः, ज्ञाननिमज्जनस्यैव परमार्थतो ज्ञानिलक्ष्मत्वात्। मरालोपमेनैव भाव्यं ज्ञाननिमज्जनात्, न तु शूकरसोद-

रेणाज्ञानावगाहनादित्यत्र निष्कर्षः।

अथ मन्यामहे ज्ञानोपादेयताम्, किन्त्वगाधोऽयं श्रुतसागरः, अल्पमतयश्च वयम्, अतोऽज्ञानमेवार्हत्यस्माकमिति चेत् ? अत्राह-

**निर्वाणपदमप्येकं**
**भाव्यते यन्मुहुर्मुहुः।**
**तदेव ज्ञानमुत्कृष्टं**
**निर्बन्धो नास्ति भूयसा॥२॥**

**यत्** - आगमाभिहितात्यद्भुतमाहात्म्यतया स्मृतिगोचरः, **एकम्** - पदान्त-

रसहायविरहिततयाऽद्वितीयम्, **निर्वाणम्** - कषायदवानलनिर्वृतिप्रसूतनिरुपमसौख्य-संवित्तिस्वरूपात्मदशाविशेषः, तदभिधा-यकमभिधानम्, तत्प्राप्तसत्त्वसङ्घातधाम वा - **निर्वाणपदम्**, तदपि **मुहुर्मुहुः** - विरलताविहितविस्मरणासहिष्णुतयाऽविरलमेव, **भाव्यते** - भावनाज्ञानगोचरीकरणेन चन्द-नगन्धवदात्मपरिणतिं नीयते, **तदेव** - समस्तभवभावनाविभेदनविचक्षणनिर्वाण-पदमात्रविषयभावनाज्ञानम्, **उत्कृष्टम्** - परिपूर्णचतुर्दशपूर्वश्रुतसकाशादपकर्षलेश-तोऽप्यकलङ्कितम्, तत्तुल्यफलत्वात्,

**ज्ञानम्**- सम्पूर्णस्वभावाऽऽविर्भावसिद्धि-साधनम्। यत एवम्, अतो- **भूयसा** -ग्रन्थशतसहस्रादिबहुना पठनेन, **निर्बन्धः** -हठाग्रहः, **नास्ति** -विभावितभावनाज्ञान-लवमात्रमाहात्म्यानां स्वप्नेऽपि नैव विद्यते।

मुहुर्मुहुः परिभाव्यमानं हि निर्वाणपदं विघटयति समस्तामपि कषायघटाम्, क्षपयति विषयव्यासक्तिम्, प्रादुर्भावयति स्व-स्वरूपम्, विवृणोत्यात्मगुणगणम्, वितरतीहैव जीवन्मुक्तिमहानन्दम्, नयत्यल्पकालेनैव सिद्धिसुखधाम, तत् कथं नैतदुत्कृष्टं ज्ञानम् ? न च मोक्षादप्युच्चतरं पदं

विद्यते किञ्चित्, यत्र नयत् ज्ञानान्तर-मुत्कृष्टतरं स्यात्।

ननु चैवं सति शेषाशेषज्ञाननैरर्थ्यं प्रसज्येतेति चेत् ? न, अभिप्रायापरिज्ञानात्, एतेन हि जिनवचनलवमात्रस्यापि सामर्थ्यप्रकर्षोऽभिहितः। यथोक्तम्- एक-मपि जिनवचनाद् यस्मान्निर्वाहकं पदं भवति। श्रूयते चानन्ताः सामायिकमात्र-पदसिद्धाः - इति (तत्त्वार्थकारिका)। एवं समस्तस्यापि जिनवाङ्मयस्यान्यतममपि पदं संसारसागरोत्तारकम्, अतो नान्यतमपदभावनाज्ञानस्योत्कृष्टत्वक्षतिः,

नापि शेषज्ञाननैरर्थ्यम्। निर्बन्धस्तु न विद्यते भूयसा, माषतुषमुनिप्रभृतेरल्पतमश्रुतस्याप्युत्कृष्टत्वानपायात्, फलभेदविरहात्। भवति हि गीतार्थपारतन्त्र्यपरिभूषितानां तथाविधज्ञानावरणोदयाऽऽवृतविशिष्टज्ञानसम्भवानामल्पतमस्यापि परिणतिप्राप्तज्ञानस्य सर्वश्रुतसन्धारणप्राप्यफलप्रापकत्वम्। सत्यपि सामर्थ्ये ज्ञानोपार्जनोद्यमविमुक्तता तु प्रमादमात्रपर्यवसायिनी ज्ञापयति निबिडाज्ञत्वमेवालसस्येति त्याज्या सा। न हीदृशे प्रमादे सति प्राप्तस्य यत्किञ्चिज्ज्ञानस्यापि

सम्भाव्यते भावनाज्ञानान्तर्भावः। भावनाज्ञानप्रमादयोः परस्परपरिहारस्थितत्वनियमात्। सति हि भावनाज्ञानेऽवश्यं भवति विहितप्रवृत्तिर्निषिद्धनिवृत्तिश्च। अतः कर्तव्यो ज्ञानोपार्जने समुद्यमः। प्रवर्त्तितव्यं विहितेषु। निवर्त्यं निषिद्धेभ्यः। परिभावनीयमभीक्ष्णमेव जिनवचः। एवं मुहुर्मुहुः परिभाव्यमानं ज्ञानमात्मसात् भवति, तथा चागमः - से आया- इति (**समवायाङ्गम्**)। ततश्च प्रत्यक्षश्रुतभूतस्स आत्मा पुनाति स्वास्तित्वमात्रेण जगदिदम्। मौन्यपि प्रददाति देशनाम्। तरति स्वयं संसार-

सागरम्। तारयति चापरानपि भव्यजीवान्। स एष सर्वोऽपि भावनाज्ञानानुभावः। अतो यतितव्यमत्र नियोगतः।

अथ 'तदेवे'ति श्रुतेरवधारणयोगादेतदन्यज्ञानोत्कर्षव्यवच्छेदः प्रतिपत्तव्यः, अन्यथा तन्नैरर्थ्यप्रसक्तेः। तथा चानन्तरोक्तं सर्वमपि वितथतां व्रजतीति चेत् ? न, पदमप्येकम्- इत्यत्रत्य- अपि-पदेन भावनाज्ञानगोचरीभूतसर्वस्यापि सामर्थ्यतो गृहीतत्वात्। आस्तां समस्तजिनवाङ्मयम्, ग्रन्थसहस्रं सिद्धान्तशतादि वा, एकं निर्वाणपदमपि भावनाज्ञानगोचरीभूतमुत्कृष्टं

ज्ञानमिति तात्पर्यम्। अत एवकारेण तस्यैव व्यवच्छेद ऊह्यः, यद् भावनाज्ञानव्यतिरिक्तम्, अपि - पदेनैव वृत्तान्तर्भूतेन भावनाज्ञानविषयीभूतसमस्तश्रुतस्योत्कृष्टतायाः स्वयं स्वीकरणात्।

भावनाज्ञानव्यतिरिक्तं तु शुकपाठानतिशायितया परमार्थतो ज्ञानमात्रमपि नेति का तदुत्कर्षवार्त्ताऽपि ? स्फटिकाश्रयोपाध्युपरागोपममेव तत्, यदप्राप्तात्मपरिणति श्रुतमात्रम्। अतः श्रुतज्ञानं चिन्ताज्ञानपरिणतिक्रमेण भावनाज्ञानतां प्रापणीयम्। यतनीयं चैतदर्थं गुरुभक्त्यादिविधाने,

यदाहुः- गुरुभक्त्यादिविधानात्कारणमेतद् द्वयस्येष्टम् - इति (षोडशकम्)।

अन्यथा तु सुबह्वपि श्रुतमधीतं व्यर्थम्, भावनाज्ञानाभावेन विहितप्रवृत्त्या-दिनियमविरहात्, तथा चार्षम् - सुबहुं पि सुअमहीयं किं काही चरणविप्पमुक्कस्स। अंधस्स जह पलित्ता दीवसयसहस्सकोडी वि - इति - (आवश्यकनिर्युक्तिः)। भावना-ज्ञानविषयीभूतं त्वल्पमपि श्रुतं प्रकाशयति परमपन्थानम्, सनयनस्य यथैकोऽपि प्रदीपः, तदुक्तम् - अप्पं पि सुअमहीयं पयासइ विसुद्धचरणस्स। इक्को वि जह

पइवो सचक्खुयस्स पयासेइ - इति (आवश्यकनिर्युक्तौ)।

ननु तत्त्वज्ञानान्निःश्रेयसमित्युक्तेर्न चरणाऽऽचरणदुराग्रह उचितः, क्रियारहित ज्ञानमात्रादेव समीहितसिद्धेरिति चेत् ? न, ज्ञानक्रिययोः समुदितयोरेव सिद्धि-साधक-त्वात्, प्रत्येकस्य तत्साधनेऽसमर्थत्वात्, ज्ञातव्योऽत्राऽऽगमिकोऽन्धपङ्गुन्यायः, यथा- हयं नाणं कियाहीणं हया अन्नाणओ किया। पासंतो पंगुलो दड्ढो धावमाणो अ अंधओ - इति (आवश्यकनिर्युक्तिः)।

ननु चोत्कृष्टचरणक्रियस्यापि तावन्न भवति मोक्षः, यावन्न केवलज्ञानोदयः, अतो ज्ञानमेव सिद्धिसाधनत्वेन सिध्यति, अपरस्यान्यथासिद्धत्वादिति चेत् ? तुल्य-मेतदन्यत्र, शैलेषीकरणक्रियां यावन्न करोति, तावन्न केवलिनोऽपि मुक्तिरित्यपि वक्तुं शक्यत्वात्। अतो निमील्य नेत्रे माध्यस्थ्यमास्थाय चिरं विचार्य 'ज्ञान-क्रियाभ्यां मोक्ष' इत्यार्षम्। न हि भोजनज्ञानमात्रात् तृप्तिः, नाप्यन्धक्रियया वालुकामभ्यवहरत इति निपुणं निभाल-नीयम्। क्रियामात्रतः सिद्धिसम्भवे चतुर्दश-

पूर्वश्रुतसन्धारणयत्नो निरर्थकः प्रसज्येत। ज्ञानमात्रस्य च मुक्तिप्रदत्वे तीर्थकृतामपि प्रव्रज्याग्रहण-तपश्चरणादिपुरुषार्थो न घटाकोटिमाटीकेत। अत उभयसमुदय एव सिद्धिरिति दृढमवधारणीयम्।

वस्तुतस्तु तत् तात्त्विकं ज्ञानमेव न, यत् क्रियाविकलम्, नापि सा क्रियाऽपि पारमार्थिकी, या ज्ञानरहिता। अतो द्वयोरपीतरसंवलितयोरेव स्वरूपलाभसम्भवात् कथमेकेन सिद्धिरित्यभिधीयमानं साङ्गत्यमुपेयात् ? नैतत् स्वमनीषिकयैवोच्यते, उपनिबन्धनमप्यस्याऽऽर्षम्- अत एवाऽऽ-

गमज्ञस्य या क्रिया सा क्रियोच्च्यते। आगमज्ञोऽपि यस्तस्यां यथाशक्ति प्रवर्तते - इति (शास्त्रवार्त्तासमुच्चयः)।

अतोऽत्रापि तदेव ज्ञानमुत्कृष्टतयाऽभिहितम्, यद् भावनाज्ञानस्वरूपत्वेन क्रियासचिवम्। तस्यैव दोषापनोदद्वारेणाऽऽत्मस्वभावाऽऽविर्भावहेतुत्वात्। एतदेव ज्ञानपरिभाषाद्वारेण स्पष्टयति -

**स्वभावलाभसंस्कार -**
**कारणं ज्ञानमिष्यते।**
**ध्यान्ध्यमात्रमतस्त्वन्य-**
**त्तथा चोक्तं महात्मना॥३॥**

**स्वभावः** - सर्वपरलक्षणात्यन्तवि-
लक्षणस्वलक्षणम्, तस्य **लाभः** - सकल-
परभावापाकरणसम्प्राप्ताऽऽविर्भावः, तदा-
त्मकः **संस्कारः** - अखिलविकारनिकार-
प्रसूतात्मपरिणामविशेषः, तस्य **कारणम्**-
अव्यभिचारी हेतुः, **ज्ञानम्** - चिच्चम-
त्कृतिस्फूर्त्तिः, इति परिणतपारमर्षपीयूषैः
**इष्यते** - असंशयमभ्युपेयते।

किमेतदन्यन्न भवति ज्ञानमित्यत्रा-
ऽऽह- **अतः** अनन्तराभिहितलक्षणलक्षि-
तादात्मपरिणामात्, **अन्यत्**- भिन्नलक्षण-
लक्षिततया व्यतिरिक्तम्, **तुः** विशेषणार्थः,

स चाऽऽत्यन्तिकान्यत्तां विशेषयति, भवत्येवावश्यं भेदप्रकर्षोऽमृतविषयोरिति हृदयम्, किं तर्हि तदन्यदित्याह - **ध्यान्ध्यमात्रम्** - केवलमान्ध्यमेव मतेः, जाड्यमज्ञानमिति यावत्।

अयमाशयः - यथा ह्यपहृतसर्वस्वस्य द्वित्राकार्षापणमात्रलाभेन सन्तोषो मौर्ख्यमात्रम्, एवं स्वभावलाभवञ्चितस्य वाणिज्यविद्याद्युपार्जनाऽऽयासोऽपि मौढ्यमेव, स्वभावप्रापणेऽसमर्थस्य तस्य सर्वस्याप्यज्ञानमात्रत्वसिद्धेः। तज्ज्ञानमेव न भवति, यदुद्दीपयति कषायाग्निम्, तत्प्रशमनैक-

परत्वाज्ज्ञानस्य। कथमेतदपि ज्ञानव्यपदेशभाक्, यद् विवर्धयति विषयतृष्णाम्, तदुपशमोपनिषद्रूपत्वाज्ज्ञानस्य। अतः कृतमनेनाज्ञानमात्रपर्यवसितेन।

ननु च नैतदुपेक्षयेहलोकनिर्वाह एव स्यादिति चेत् ? सत्यम्, तथाप्युपेक्षत एतद् लोकद्वयनिःस्पृहो ज्ञानी, मोक्षमात्राभिलाषत्वात्तस्य, उक्तश्च- मोक्षायैव तु यतते विशिष्टमतिरुत्तमः पुरुषः-इति (**तत्त्वार्थकारिका**)। युक्तश्चैतत्, ऐहिकादिनिर्वाहस्य भवभावाभिवर्धनपर्यवसानत्वात्, तद्बुद्धिहेतुयत्नपरस्य ज्ञानित्वक्षतेः। यो ह्यात्मा-

नमधिकृत्यापि शुष्कवादविसरवितानो वितन्यते, सोऽपि ध्यान्ध्यमात्रमेव, तदा लौकिकशास्त्राणि तु सुतरां ध्यान्ध्यमात्रम्, तत्त्वान्तप्रापणेऽत्यन्तमप्रत्यलत्वात्। अत्र समर्थनमाह- **तथा** ध्यान्ध्यत्वसिद्धिविधावुक्तप्रकारेण **चोक्तम्**- युक्त्यनुभवादिप्रसिद्धतयाऽभिहितम् **महात्मना** - प्रथमयोगदृष्टिसमनुगतगुणगणगरिमोपेततया महापुरुषेण पतञ्जलिना, किमुक्तमनेनेत्याह-

**वादांश्च प्रतिवादांश्च**

**वदन्तोऽनिश्चितान् तथा।**

**तत्त्वान्तं नैव गच्छन्ति**

**तिलपीलकवद् गतौ ॥४॥**

**अनिश्चितान्**- सर्वज्ञाज्ञानुसरणनैरपेक्ष्यात्स्वच्छन्दमतिप्रवर्त्तितशुष्कतर्कमात्राऽऽलम्बनतया सन्दिग्धान् **वादान्**- परमतखण्डनस्वाभिमतसिद्ध्यर्थमुपन्यस्तान् पूर्वपक्षान्, **प्रतिवादान्**- उक्तार्थमेव प्रस्तुतानुत्तरपक्षान्, **चकारावुभयत्रासन्देहभावा**तिक्रमसाम्यप्रदर्शकौ, **तथा** शुष्कवादविवादमात्रप्रकारेण, ते वादिप्रतिवादिनः **तत्त्वान्तम्** - वस्तुस्वरूपविनिश्चयम्, **नैव गच्छन्ति** - कल्पान्तेऽपि न प्राप्नुव-

न्त्येव, गन्तव्यप्राप्त्यनुपायत्वादुन्मार्गगमनस्य, तथाविधवादादेश्चानुपायभूतत्वात्तत्त्वान्तगमने। अत्रोदाहरयति- **गतौ**-ग्रामान्तरादिगमनविधौ, **तिलपीलकवत्** -तैलनिष्काशनयन्त्रयोजितबलीवर्दवत्। यथा ह्यसौ सम्पूर्णमपि दिनं यावद् गमनक्रियाप्रवृत्तोऽपि न तैलीगृहाङ्गणमात्रादपि बहिस्ताद् गच्छति, आस्तां ग्रामान्तरम्। एवं वादिप्रभृतिरपि।

कथन्नाम जलसाध्यमनलेन सिध्येत् ? गीतार्थपारतन्त्र्यपरिपूतमार्गानुसारिमतिमात्रप्राप्यं हि तत्त्वान्तम्, तच्चालभ्यमेव शुष्कतर्कवि-

तर्कणविकृतवैदुष्यानाम्। अपि च ज्ञान-मान्द्याद्युपमः शुष्कतर्कः, अतोऽप्राप्य एवास्य ज्ञानपार इति न किञ्चिदुपपन्नम्, उदाहुश्चाचार्याः - बोधरोगः शमापायः श्रद्धाभङ्गोऽभिमानकृत्। कुतर्कश्चेतसो व्यक्तं भावशत्रुरनेकधा- इति (**योगदृष्टि-समुच्चयः**)।

आस्तां तत्त्वान्तगमनम्, अनर्थगम-नमेव शुष्कवादात्, अतस्त्याज्यः सः, यदुक्तम्- विजयेऽस्यातिपातादि-र्लाघवं तत्पराजयात्। धर्मस्येति द्विधाऽप्येष तत्त्वतोऽनर्थवर्धनः - इति (**अष्टकम्**)।

अतो विरम्यं वादात्, प्रतिक्रमणीयं कुतर्कात्, अवलम्बनीयश्चागमः, तद्गोचरत्वादतीन्द्रियभावानाम्, अन्वाह-

*अतीन्द्रियार्थसिद्ध्यर्थं यथाऽऽलोचितकारिणाम्।*
*प्रयासः शुष्कतर्कस्य न चासौ गोचरः क्वचित्॥*
*गोचरस्त्वागमस्यैव ततस्तदुपलब्धितः।*
*चन्द्रसूर्योपरागादि- संवाद्यागमदर्शनात्॥*
*एतत्प्रधानः सच्छ्राद्धः शीलवान् योगतत्परः।*
*जानात्यतीन्द्रियानर्थान् तथा चाह महामतिः॥*
*आगमेनानुमानेन ध्यानाभ्यासरतेस्तथा।*
*त्रिधा प्रकल्पयन् प्रज्ञां लभते तत्त्वमुत्तमम्*
- इति ***(योगदृष्टिसमुच्चयः)***।

एतेन- अपि पौरुषमादेयं शास्त्रं चेद् युक्तिबोधकम्। अन्यत्त्वार्षमपि त्याज्यं भाव्यं न्यायैकसेविना- इत्यादिपुरस्कारेण युक्तिमात्रावलम्बनमपि प्रतिविहितम्, प्रतिनियतगोचरत्वेन युक्तीनामतीन्द्रियार्थागोचरत्वात्। दृश्यन्ते च दृष्टेष्टबाधितार्थेऽपि युक्तिप्रवृत्तयः, यथा- सलोमा मण्डूकाः, चतुष्पादवत्त्वे सत्युत्प्लुत्य गमनात्, हरिणवत्। यद्वा जलचरो मयूरः, विहङ्गमत्वात्, हंसवत्। अतस्त्याज्यः शुष्कतर्कः, आत्मार्थविरोधित्वात्तस्य।

नन्वेवम् - पक्षपातो न मे वीरे न द्वेषः

कपिलादिषु। युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः - इति वचः प्लवत इति चेत् ? न, अभिप्रायापरिज्ञानात्, न ह्यत्र युक्तिमात्रं प्रतिक्षिप्यते, अपि त्वनुचिततदवलम्बनम्। यथा गन्धपरीक्षणे नौचितीमञ्चति चक्षुराश्रय एवं प्रकृतेऽपि बोध्यम्। यदीयं वचः प्रत्यक्षादिष्वस्खलितम्। तस्य हृषीकातीतगोचरमपि शक्यते श्रद्धातुम्, श्रद्धेयमेव च तत्, तत्रापि युक्तिमार्गणस्य विफलत्वात्, मौर्ख्यलक्ष्मत्वाच्च। यत्तु वचः प्रत्यक्षेऽपि विसंस्थुलतां दर्शयति, तत् परोक्षार्थे सुतरामश्रद्धेयम्, तच्छ्रद्धानस्य जाड्यानतिरि-

क्तत्वात्, अभिहितं च- दृष्टबाधैव यत्रास्ति, ततोऽदृष्टप्रवर्त्तनम्। असच्छ्रद्धाभिभूतानां केवलं ध्यान्ध्यसूचकम् - इति (**योग-बिन्दुः**)।

सूक्ष्मेक्षणनिरीक्ष्योऽयं तर्ककुतर्कादि-विभागः सदसद्वादविवेकश्च विवेचितोऽस्माभिर्वादोपनिषदीति नात्र प्रतन्यते। स्वरूपरमणमेव श्रेयस्तममिति त्वत्र तात्पर्यार्थः। एतदेव व्यक्तं व्याचष्टे-

**स्वद्रव्यगुणपर्याय-**
**चर्या वर्या पराऽन्यथा।**

इति दत्तात्मसन्तुष्टि-
र्मुष्टिज्ञानस्थितिर्मुनेः ॥५॥

**स्वः** - सर्वपरभावाभावालङ्कृत-स्वभावमात्रलक्षण आत्मा, तत्तत्पर्यायत्वेन द्रवति-परिणमतीति **द्रव्यम्**, आत्मैव द्रव्यम् - आत्मद्रव्यम्, तच्च धर्मादि-शेषद्रव्यपञ्चकादत्यन्तविलक्षणमुपयोगैक-लक्षणं प्रतिपत्तव्यम्। **गुणः** - स्व-सम्बन्ध्येव ज्ञानादिः, **पर्यायः** - तत्तज्ज्ञा-नादिक्षणतया परिणाम एव स्वसम्बन्धी, तेषु **चर्या**-परमप्रह्लादप्रदस्तदुपयोगोपवन-सञ्चारः, सैव **वर्या** - एकान्ति-

कात्यन्तिकसुखसवित्रीतया परमा, अत्रावधारणमेव व्यतिरेकतो व्यनक्ति - **परा** - परद्रव्यगुणपर्यायचर्या, **अन्यथा** - अपरप्रकारमाश्रिता, न वर्या, जघन्येति यावत्, दुःखैकदरीरूपत्वात्तस्याः, **इति** - अनन्तराभिहितवर्येतरविवेकलक्षणा, **मुनेः** - समस्तपरद्रव्यादिगोचरप्रवृत्ति-निवृत्तस्य, **मुष्टिज्ञानस्थितिः** - अल्प-शब्दमहार्थावगममुद्रा, **दत्तात्मसन्तुष्टिः** - समाप्तसर्वपरद्रव्यादिस्पृहतया वितरित-स्वद्रव्यादिमात्रसन्तोषसौख्या।

परद्रव्यादिसम्प्रसृतिरेव सर्वपीडाप्रसर-

प्रसूः। तत्प्रवृत्तो हि सततमपि क्लिश्यते तदवाप्तिसंरक्षणादिहेतोः। सङ्क्लिश्यतेऽनवरतं तदुपायचिन्ताप्रवृत्तः। हर्षविडम्बनामवाप्नोति तदवाप्तौ। कवलीभवति शोकस्य तद्विनाशविचारेऽपि। अपहृतप्रायप्राणो भवति तदपहारप्रसङ्गे। साध्वससम्पूर्णो भवति तत्स्वाधीनभावेऽपि। दारुणतममृत्युगोचरीभवति तत्सर्वपरिहारसन्त्रासतः।

ननु चैवं सत्यपि दुस्त्यजैव परद्रव्यादिचर्या, तां विना संसारनिर्वाहस्यैवासम्भवादिति चेत् ? तदेतदेव तत्सुत्या-

गत्वे हेतुर्विवेकिनाम्, अनन्तदुःखैकसागर-भूतस्यास्यानिर्वाहस्यैव तदिष्टत्वात्।

स्यादेतत्, परिहृतेतरसङ्गस्यापि निर्ग्रन्थस्योपकरणादिपरद्रव्यचर्याया आवश्यकतयाऽविषय एव तत्त्यागोपदेशविस्तर इति चेत् ? न, तत्सङ्गेनापि विमुक्तत्वान्निर्ग्रन्थस्य, तुरगवत्, तदार्षम् - यद्वत्तुरगः सत्स्वप्याभरणविभूषणेष्वनभिषक्तः। तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः- इति (**प्रशमरतिः**)। न हि संयोगमात्रप्रभवा परद्रव्यादिचर्या, तथात्वे केवल्यादेरपि तत्प्रसङ्गात्, आदिना सिद्धपरिग्रहः। अपि

तु रागादिसचिवतदुपयोगलक्षणा। सा चोपकरणभावेऽपि नास्त्येव निर्ग्रन्थस्य, तद्भावानुभावात्। एतदेव निर्ग्रन्थस्य तत्त्वं यद् भावेऽप्यभावोद्भूतविभूतिविशिष्ट-त्वम्। समर्थितं ह्येतत्तुरगज्ञातेन।

न चैवं गृहिणामपि परद्रव्यादिचर्यावि-मुक्तिसम्भवस्स्यादिति वाच्यम्, सर्वज्ञानु-ज्ञातधर्मोपकरणातिरिक्ततिलतुषमात्रपरि-ग्रहिणामपि तच्चर्याचरकत्वानपायात्। ज्ञापकश्चास्य तत्परिग्रह एव, धूम इव धूमयोनेः। अतिरिक्तपरिग्रहे परद्रव्यादिचर्यैव प्रयोजकतां व्रजतीति हृदयम्। विहितो-

पधिधारित्वे तु जिनाज्ञैव प्रयोजिकेति सम्भवति तद्युतस्य स्वद्रव्यादिमात्रानुचारिता। जिनोक्तविधिना तत्प्रतिलेखनादिप्रवृत्तिरपि परमार्थतः स्वद्रव्यादिचर्यैव, तद्धेतुभावात्। एवञ्चोपेयहेतुत्व उपायस्यापि तत्त्वमिति सूक्ष्मचक्षुषाऽऽलोच्यम्।

स्यादेतत्, मा भूत्तावानपि परिग्रहः, रागादिहेतुत्वात्, अत आशाम्बरत्वमेव श्रेयः, सर्वपरद्रव्यसंयोगपरिहारेण तच्चर्यापरिहारस्य सुखेन सम्भवादिति चेत् ? न, विहितधर्मोपकरणविकलस्य संयमबाधाध्रौव्यात्, भिक्षाविशुद्ध्याद्यसम्भवात्। न

च मा भूत् सा, स्वद्रव्यादिचर्ययैव समीहितसिद्धेरिति वाच्यम्, षट्कायविराधनामुरीकुर्वतो हिंसादिदोषकलुषितमतेः स्वद्रव्यादिचर्याया असम्भवात्, तत्कालुष्यस्य क्लिष्टतरपरद्रव्यत्वात्। न हि धर्मोपकरणं परिग्रहः, तस्य मूर्च्छालक्षणत्वात्, तथा च पारमर्षम् - जं पि वत्थं व पायं वा कंबलं पायपुच्छणं। तं पि संजम-लज्जट्ठा धारंति परिहंति य। न सो परिग्गहो वुत्तो णायपुत्तेण ताइणा मुच्छा परिग्गहो वुत्तो इइ वुत्तं महेसिणा - इति **(दशवैकालिकम्)**।

अवश्यमेतदेवमभ्युपेयम्, अपरथा

देहस्यापि परिग्रहत्वानपायात्, तथा च प्रव्रज्यादेहोत्सर्गयोरनर्थान्तरत्वप्रसक्तिरिति निपुणं निभालनीयम्। न हि जिनाज्ञां पुरस्कृत्य धर्मोपकरणमुरीकुर्वतो रागादि-दोषसम्भव इत्यानुभविकम्। अतो निरा-बाधैव तस्य स्वद्रव्यादिमात्रचर्या।

चर्या चैषेत्युपेया सर्वात्मनाऽपि, परम-साम्यसमाधिनिदानत्वात्। भवति हि पर-वृत्तान्तमूकान्धबधिरस्य स्वमात्रजागरभा-वानुभावकस्यायं सदाप्यस्खलितः, उक्तञ्च-आत्मप्रवृत्तावतिजागरूकः, परप्रवृत्तौ बधिरान्धमूकः। सदा चिदानन्दपदोपयोगी

लोकोत्तरं साम्यमुपैति योगी - इति (अध्यात्मोपनिषद्)।

स्यादेतत्, प्रायो विश्वमपीदं विश्वं सौख्याशया परप्रवृत्तिपरिणतमेवोपलभ्यते, अतोऽत्रापि किञ्चित् सौख्यं स्यात्, बहुजनप्रवृत्तेरन्यथाऽनुपलब्धेरिति चेत् ? न, आत्मप्रभवत्वात्सुखस्य तद्विपक्षप्रसूतत्वासम्भवात्, अन्यथा हेतुफलव्यवस्थाविप्लवप्रसङ्गात्, अन्वाह- नाकारणं भवेत् कार्यं नान्यकारणकारणम्। अन्यथा न व्यवस्था स्यात् कार्यकारणयोः क्वचित् - इति। यदि

हि सिकतातः तैलं वृषभाच्च क्षीरं प्राप्येत, तदा परप्रवृत्तेः सौख्यसम्प्राप्तिस्स्यात्। अतः परिहृत्याऽफलाऽऽयासमात्ममात्रावलम्बनं करणीयं सुखार्थिना, तदेकोपायत्वात्तस्य, अवदाम चान्यत्र - दुग्धो वृथैव वृषभो नु पयःस्पृहेण, सम्पीलिताऽपि सिकता ननु तैलहेतोः। सौख्याशया श्रितवतेह मया परौघं स्वात्मन्यथः सुखमये नितरां निलीये- इति **(शमोपनिषद्)**।

अतो न बहुजनोऽनुसर्त्तव्यः अपि तु महाजनः। स च परस्मात् प्रत्यावृत्त्याऽऽत्ममात्रनिलीनोऽध्यात्मसौख्यमनुभवन्नुप-

लभ्यत इति न किञ्चिदनुपपन्नम्। कर्त्तव्यमत आत्मान्तर्निमज्जनम्। एवमेवापारपारावारोपमसुखसंवित्त्यधिगत्याऽशेषपरद्रव्यप्रीत्यपहतिसिद्धेः। को हि सचेतनः स्वगृहाङ्गणस्थे कल्पतरावटव्यटनं विदध्यादिति। उक्तञ्च - अन्तर्निमग्नः समतासुखाब्धौ बाह्ये सुखे नो रतिमेति योगी। अटत्यटव्यां क इवार्थलुब्धो गृहे समुत्सर्पति कल्पवृक्षे - इति **(अध्यात्मोपनिषद्)**।

विषकुण्डसोदरा हि परपरिणतिः। यत्र निमग्ना विषहन्ति विविधदुःखानि। प्रतिपद्यन्ते शीलशैथिल्यम्। व्रजन्ति गरिमग्ला-

निभावम्। प्राप्नुवन्त्यतुच्छमूर्च्छाम्। परित्यजन्ति लज्जादिगुणगणम्। एवञ्च नावाप्यते किञ्चिदपि परस्मादात्मना, अपि त्वात्मविक्रय एव क्रियते। अतः निवर्त्त्यं निखिलपरनिकुरम्बतः। संविधातव्यः स्वगुणाभ्यासः। कर्त्तव्यो मदमोहादिनिरासः। अभिलष्यमतुल्यं प्रशमसुखम्, एवमेव निरुपमपदावाप्तियोगात्, यदार्षम्- स्वगुणाभ्यासरतमतेः परवृत्तान्तमूकान्धबधिरस्य। मदमदनमोहमत्सररोषविषादैरधृष्यस्य॥ प्रशमाव्याबाधसुखाभिकाङ्क्षिणः सुस्थितस्य सद्धर्मे तस्य किमौपम्यं स्यात्

सदेवमनुजेऽपि लोकेऽस्मिन् ? - इति (प्रशमरतिः)॥

चरितव्याऽतः स्वद्रव्यगुणपर्याय-चर्या, तच्चारमात्रस्य चारुताऽनतिक्रमात्, इतरत्राचारुताऽनवधेश्चेति प्रकारान्तरतः प्रस्तौति-

**अस्ति चेद् ग्रन्थिभिज् ज्ञानं**
**किं चित्रैस्तन्त्रयन्त्रणैः ?।**
**प्रदीपाः क्वोपयुज्यन्ते**
**तमोघ्नी दृष्टिरेव चेत्॥६॥**

**चेत्** - यदि, **ग्रन्थिभित्** - दुश्छेद्यदारुग्रन्थिस्थानीयनिबिडरागद्वेषानुगताऽऽत्म-

परिणामपरिविलयपटुतापरिपूतम्, **ज्ञानम्** - आत्मसंवलिताऽपि रागाद्यध्यवसायपरिणतिः परमार्थतः परभावतया हेयैवेति स्पष्टः समवगमः, **अस्ति** - गुरुभक्त्याद्यनुभावेनाऽऽत्मसात्तया विद्यते, तदा **चित्रैः**-ज्योतिःशिल्पनिमित्तछन्दःपुराणप्रभृतिनैकविधप्रकारप्रकीर्णैः, **तन्त्रयन्त्रणैः** निगडानतिशयिसिद्धान्तबन्धनैः, किम् ? न किञ्चित्तैः स्वरूपानुसन्धानासाधनभूतैरित्यभिप्रायः। अत्रार्थे दृष्टान्तमाह- **चेत्**- यदि, **दृष्टिरेव** - चक्षुरेव, **तमोघ्नी** - सर्वसन्तमससम्प्रतिघातविदुषी, तदा **प्रदीपाः** -

देदीप्यमानज्योतिर्मौलयोऽपि दीपकाः, **क्व**-प्रयोजनविशेषे, **उपयुज्यन्ते** ? न क्वाप्युपयुज्यन्ते, सिद्धत्वात्तमोविघातप्रयोजनस्य, प्रयोजनान्तरस्य च विरहादिति भावः।

यदि हि रागादिदोषविघातसमर्थं नास्त्येव ज्ञानम्, तदा ज्योतिरादितन्त्राण्यभ्यस्यमानानि न किञ्चित् कल्याणमावहेयुरात्मनः, अपि त्वनर्थमेव कुर्युः, अतोऽनर्थकान्येव तानि शास्त्राणि। अथास्त्येव रागादिनिकारनिपुणं ज्ञानम्, तदाऽपि निष्फलान्येव तन्त्राणि, तथाविधप्रयोजनलेशेऽप्यनुपयोगित्वात्। ग्रन्थिभेदपटुज्ञानभावे

तदभावे चैवं द्विधाऽपि कृतमेव तन्त्रैः, परमार्थतो यन्त्रणानतिरिक्तत्वात्तेषामित्याशयः।

स्वभावलाभसंस्कारकारणं हि ज्ञानमित्युक्तम्, शास्त्रत्वेनाभिमतं चेत्तत्कारणं न स्यात्तदा नैतज् ज्ञानव्यपदेशमर्हति, लक्षणातीतत्वात्, परमार्थतोऽज्ञानरूपत्वात्, कामशास्त्रादिवत्। यदि त्वेवमपि तज्ज्ञानत्वमिष्यते, तदा कामशास्त्रादेरपि तदस्तु, तुल्यन्यायात्, अलक्ष्यत्वाविशेषात्। नो चेदत्रापि मा भूत्, उक्तहेतोः।

नन्वेवं सति स्वतन्त्रतयाभिमतान्यपि ज्योतिष्करण्डकप्रभृतिशास्त्राण्यज्ञानत्वमनुप्रविशेयुरिति चेत् ? को वा किमाह ? अनधिकारिणं प्रतीत्यैवमेव, तस्य स्वभावलाभसंस्कारे तेषामहेतुत्वात्, अधिकारिणं प्रतीत्य तु तेषामपि ज्ञानत्वमेव, लक्षणसमन्वयात्, प्रव्रज्याप्रदानादौ - सुहतिहिनक्खत्तकरणजोएसु - इत्यादिजिनाज्ञापरिपालनप्रयोजनेनैव तत्प्रवृत्तेः, जिनाज्ञापरिपालनाशयस्य च स्वभावलाभानुगुणत्वात्। अनधिकारिणस्तु यत्र तत्रापि कृत्ये सम्यक्करणत्वाभाव एव, अनधिका-

रित्वादित्यालोचनीयं पट्टप्रतिभया।

अपि च साक्षात्स्वरूपानुसन्धान-साधनभूतजिनागमोपेक्षयाऽऽनुषङ्गिकप्रयो-जननिर्वाहमात्रोपयोगितन्त्रातरगत स्वरसा-ऽऽधिक्यमेव प्रकटयति तत्प्रवृत्तस्यानधि-कारित्वम्। एवञ्चाधिकारिणमाश्रित्य यज् ज्ञानभूतं शास्त्रम्, तस्याऽप्यनधिकारि-हस्तगतस्य विडम्बनाऽज्ञानरूपता च।

न च शासनभक्त्यर्थमानुषङ्गिक-प्रयोजनसुनिर्वाहार्थं च दृढोऽत्राऽऽदरो हित इति वाच्यम्, अधिकारिणं प्रतीत्यावि-गानात्, अनधिकारिण एतदर्थप्रवृत्तस्याऽ-

प्यहितानतिक्रमाच्च। किञ्च चेतसोऽमलीकारो हि शासनभक्तिः, अस्यैव जिनाज्ञानुपालनरूपत्वात्, अभिहितञ्च- आज्ञा तु निर्मलं चित्तं कर्त्तव्यं स्फटिकोपमम्- इति **(योगसारः)**। एवञ्च स्वभावलाभप्रतिलोमतया तन्त्रान्तरप्रवृत्तानां प्रत्युताभक्तिरेव शासन इति निरीक्षणीयं सूक्ष्मचक्षुषा।

एतेन - अभ्यर्हिततया तन्त्राणां तेषु यन्त्रणत्वव्यपदेशोऽनुचितः - इति प्रतिविहितम्, शासनाभक्तेर्भवभावानुबन्धकतया निगडनिभत्वानपायात्।

ननु यस्य शुद्धा शासनभक्तिरेवाधि-

कारिणः, तदादृततन्त्रेषु तद्व्यपदेशो दुष्ट-स्स्यादिति चेत् ? ओमित्युच्यते। अत एव न तान्यधिकृत्योक्तव्यपदेशः, तेषां ग्रन्थि-भिज्ज्ञानरूपत्वात्, तद्धेतुत्वयोगात्। भवति हि हेतौ फलव्यपदेशः, घृतमायुरिति यथा। स एष व्यवहारनयाभिमतो व्याख्याप्रकारः।

निश्चयमतं त्वाश्रित्य यन्त्रणान्येव चित्रतन्त्राणि, स्वाधीनत्वसमापकत्वात्। पराधीनभावप्रयोजकं हि यन्त्रणत्वेनाभि-धीयते। तच्च तन्त्रं ज्योतिःशास्त्रं वाऽस्तु, अध्यात्मशास्त्रं वा, न तद् ग्रन्थिभिज् ज्ञानम्, तस्य क्षायोपशमिकाद्यात्मपरिणाम-

रूपत्वेन पौद्गलिकत्वासम्भवात्। न च हेतौ फलोपचारात्तत्त्वमस्त्विति वाच्यम्, निश्चयाधिकारात्, तत्र चोपचारोरीकारविरहात्। एवञ्च व्यवहारनयदृशा प्रदीपस्थानीयान्यपि तन्त्राणि निरुपयोगीनि निश्चयाभिमततमोघ्नीदृष्टिसङ्काशग्रन्थिभिज्ज्ञानसद्भावे। भवन्ति हि प्रदीपा बाह्यवस्तुतया धारणवहनतैलपूर्त्यादिसापेक्षत्वेन पारतन्त्र्यभावहेतवः, अतो यन्त्रणप्रायाः प्रकाशमयदृशाम्, एवं प्रकृतेऽप्यूह्यम्। तादृग्दृगभावे त्वादेया एव ते, अन्यथा प्रतिपदं प्रतिस्खलनध्रौव्यात्, अत

एवोच्यते - चक्षुः सर्वत्रगं शास्त्रं शास्त्रं सर्वार्थसाधकम् - इति **(योगबिन्दौ)**।

एवञ्च व्यवहारेण प्रागुक्तव्यपेक्षया ज्योतिःशास्त्रादेरपि ग्रन्थिभिज्ज्ञानत्वम्, शुद्धनिश्चयेन तु नाध्यात्मशास्त्रस्यापि तत्त्वम्, उक्तहेतोः।

यदि त्वध्यात्मशास्त्रतया तद्गतोपयोगस्तदभिहितवचोऽनुरूपक्रियापरिणतिरेव वाऽभिधीयते, तदा तु निश्चयेनापि तस्य ग्रन्थिभिज्ज्ञानत्वमेव, क्षायोपशमिकत्वाद्यनतिक्रमेण तस्यानौपचारिकतया मुख्यत्वादिति दिक्।

॥ ६० ॥

तदेतत्तत्त्वपरिणत्या यद् भवति, तदाह-

**मिथ्यात्वशैलपक्षच्छिद्,**
**ज्ञानदम्भोलिशोभितः।**
**निर्भयः शक्रवद् योगी,**
**नन्दत्यानन्दनन्दने॥७॥**

**मिथ्यात्वम्**- सुखादिसाधनसङ्घातगतविपर्यस्तमतिः, सुखादिसाधनेषु दुःखसाधनत्वबुद्धिः, दुःखसाधनेषु च सुखसाधनत्वप्रेक्षेत्याशयः, त एव **शैलाः**- पर्वताः, अन्तर्भावितकर्मगौरवसाहचर्यनि-

यमात्, तेषां **पक्षाः** - उड्डयनसाधनभूताङ्गविशेषाः, तान् छिनत्तीति मिथ्यात्वशैलपक्षच्छिद्, वक्ष्यमाणयोगीपदविशेषणमिदम्।

प्राक्काले किल पक्षाः पर्वताणां बभूवुरिति पुराणेषु प्रसिद्धम्। ते च यत्र तत्रोत्पतन्तो निपतन्तश्च महोत्पातं चक्रुः सचराचरस्य जगतः। अत इन्द्रेण छिन्नास्तत्पक्षाः। ततश्च ते स्थिरा बभूवुः। अत्र शैलोपमं मिथ्यात्वम्। पक्षोपमा च दुःखसाधनभूतविषयप्रवृत्तिः, तया मिथ्यात्वान-

र्गलभावसम्पादनात्। छिनत्त्येनामिन्द्रोपमो योगी।

ननु च सुखादिसाधनविपर्यस्तमतिरेव छेदनीया, विषयप्रवृत्तेः क्रियामात्रत्वेन निष्प्रमाणत्वात्। यदार्षम् - परिणामियं पमाणं - इति। इत्थञ्चोक्तमतिभावे तदभावे वाऽपि विषयप्रवृत्त्यपहतिनैरर्थ्यादयुक्ता सेति चेत् ? न, प्रमाणभूतपरिणामस्य प्रवृत्त्यधीनत्वेन तस्या अपि प्रमाणत्वात्, निर्लोठितमेतद् भावनाज्ञानवक्तव्येऽतो न पुनः प्रतन्यते। किञ्चाविपर्यस्तमतिसद्भावे तत्पुष्टिर्विषयनिवृत्त्या, तदभावे च तदुप-

पजननमनयेति द्विधाऽपि सफलैव साऽतः सर्वमवदातम्।

पर्वतपक्षच्छेदं चेन्द्रः स्वकीयशस्त्रेण वज्राभिधानेन कृतवान्, अतः प्रकृतेऽपि मुनीन्द्रस्य वज्रमभिदधन्नाह- **ज्ञानम्** - विश्वविश्ववस्तुस्तोमगतयथार्थावभासः, तदेव **दम्भोलिः** - व्रजम्, प्रोक्तच्छिदि-क्रियासाधकतमत्वात्, तेन **शोभितः**-प्रत्यात्मप्रदेशमलङ्कृतः। अयथार्थावभासेन हि क्लिश्यते जनः। अनुधावत्यशुच्य-धमामपि रामां रमणीयरमणीमत्या। गृध्य-त्यस्थिरायामपि श्रियां स्थिरबुद्ध्या। न

विरजति विशरारोरपि शरीरकादनश्वरप्रेक्षया। ज्ञानदम्भोलिना हि यथार्थावभासभूतेनैतद्विपर्यस्तमतिविच्छेदः, ततश्च स्वाधीनमेव समाधिसुखम्, विषयावाप्त्यादिप्रत्यवस्थितपरिक्लेशापगमे तस्यैव परिशिष्टत्वयोगात्।

अत एव **निर्भयः**-समाप्तसाध्वसनिबन्धनत्वात्, परापेक्षातीततया स्वभावामृतनिमग्नत्वात्, उक्तञ्च - यस्य नास्ति परापेक्षा स्वभावाद्वैतगामिनः। तस्य किं स्याद् भयभ्रान्ति-क्लान्तिसन्तानतानवम् ? - इति (**ज्ञानसारः**)।

॥ ६५ ॥

ज्ञानं हि ज्ञापयत्येव स्वपरभावभेद-भावम्। ततश्च जानाति ज्ञानी यथा गृहीत-मेवाऽऽस्ते मम यन्मद्ग्राह्यम्। यच्चाग्राह्यम्, तदाकालमप्यगृहीतमेव। एवञ्च न मम चौर्याद्याशङ्का, गोपनीयत्वविरहात्। न मम न्यासादिसाध्वसम्, रोपणीयाभावात्। न ममापनयनाऽऽतङ्कः, अपनेयविरहात्। नापि मम दानमधिकृत्य भीतिः, दातव्या-भावात्। ततश्च को नु मे भयमिति। उक्तश्च-न गोप्यं क्वापि नारोप्यं, हेयं देयं च न क्वचित्। क्व भयेन मुनेः स्थेयं ज्ञेयं ज्ञानेन पश्यतः- इति (**ज्ञानसारः**)।

कोऽसावित्याह - **योगी** - निरन्तरं ज्ञानाऽऽनन्दसन्दोहसंविहितयोगः, **शक्रवत्**- शैलपक्षच्छेदकत्वादिसाधर्म्यात् सुत्रामेव, आनन्द एव नन्दनाभिधं वनम्- **आनन्द-नन्दनम्**, तत्तद्रामणीयकवत्त्वसारूप्यात्। नन्दनं हीन्द्रस्य वनतया प्रसिद्धम्, यदुक्तम्- नन्दनं वनम्- इति (अभिधानचिन्तामणौ)। तच्चाऽऽनन्दरूपमेव भवितुमर्हति साधु-शक्रस्य, बाह्यस्यात्त्यादिपर्यवसानतया पर-मार्थतो नन्दनत्वस्यैवानुपपत्तेः, तन्निरुक्त्य-योगात्।

एवं दम्भोलिप्रभृतावपीन्द्रसम्बन्धि-

वस्तुनि ज्ञेयम्। न हि तच्छस्त्रमेव, यदन्तरारात्यभिभवेऽनुपयोगि, अतो मुनेरेव परमार्थवज्रं ज्ञानलक्षणम्, तस्यैव मोहादि-मथने मेधावित्वात्।

एवं परमार्थेन्दनक्रियायोगान्मुनेरेवेन्द्र-त्वं तदर्थसहितम्, अपरत्र वसन्तनृपाद्युपम-विडम्बनामात्रत्वात्। इत्थञ्च ज्ञानमेव पार-मार्थिकमिन्दनमिति स्पष्टयन्नुपसंहरति।

**पीयूषमसमुद्रोत्थं**
**रसायनमनौषधम्।**
**अनन्यापेक्षमैश्वर्यं**
**ज्ञानमाहुर्मनीषिणः ॥८॥**

किल सागरप्रभवं पीयूषमिति पौराणिकोक्तिः, एतत्तु सुधास्वरूपमपि न तथेत्याह- **असमुद्रोत्थं पीयूषम्**, किञ्चौषधौघोपजनितं भवति रसायनमिति तज्ज्ञाः, तदत्राव्याप्तिरेतल्लक्षणस्येत्याह- **रसायनमनौषधम्**। अपि चैश्वर्यं सापेक्षं भवति राज्यादेः, एतत्त्वपवादभूतमित्याह- **अनन्यापेक्षमैश्वर्यम्**, आ किमेतदित्यत्राह- **ज्ञानम्** - अतिक्रान्तसर्वलौकिकोपमतया निरुपमलोकोत्तरगुणगणोपेतं विज्ञप्तिविस्फूर्त्तिमात्रम्, इति **मनीषिणः** परिणतपारमर्षपीयूषपरिकर्मितमनीषा महापुरुषाः,

**आहुः** - आनन्दैकोपनिषज्ज्ञानमाहात्म्य-प्रादुश्चिकीर्षया व्याजह्रुः।

किञ्च सुधाभुजोऽपि सुराः प्रयान्ति मृत्युगोचरताम्, एवञ्च तन् नामामृतमेव यथार्थगुणविकलम्। अतो जिनवचनामृत-मेव सज्ज्ञानपर्यायप्रायमुपपद्यते परमार्थ-सुधात्वेन, एकान्तिकात्यन्तिकनिवारण-त्वाज्जन्मजरारोगमरणानाम्, तथाह स्तुति-कारः- पीतामृतेष्वपि महेन्द्रपुरःसरेषु, मृत्युः स्वतन्त्रसुखदुर्ललितः सुरेषु। वाक्यामृतं तव पुनर्विधिनोपयुज्य, शूराभिमानमवशस्य पिबन्ति मृत्योः - इति **(सिद्धसेनी-**

द्वात्रिंशिका)।

वयःस्तम्भनादिप्रयोजनेन हि प्रयुज्यन्ते रसायनानि। तच्च न स्तब्धमद्य यावत् कस्यापि, सिद्धावस्थामृते तदसम्भवात्, अतस्तदवस्थाप्रदं ज्ञानमेव परमं रसायनम्, वाङ्मात्रं तु तदन्यत्।

एवमैश्वर्यमपि चेत् परापेक्षम्, तदा न किञ्चित्तदन्यत्र विडम्बनात्। तथाहि नृपादिरप्याशङ्कते स्वसुतेभ्यः, बिभेति सामन्तामात्यादिभ्योऽपि। भयमनुभवति विषभोजनसम्भावनाभिः। शङ्कते चान्तःपुरविप्लवम्। विशुष्यति च सेनादिचिन्तया।

अत एव नीतिज्ञाः - गजे रासभे च राजरजकयोः सम एव चिन्ताभारः- इति (नीतिवाक्यामृतम्)। अतो ज्ञानमेव तात्त्विकमैश्वर्यम्, परापेक्षापरिमुक्तत्वात्। यतनीयमतोऽत्र प्रयत्नतः, अस्यैवाऽऽनन्दोपनिषद्रूपत्वादिति।

मिथ्याऽस्तु दुरुक्तं मम। शोधयन्तु बहुश्रुताः। कृतिरियमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे चैत्रिकासितत्रयोदश्यां श्रीगुरुभुवनभानुसूरिवरस्वर्गमनतिथौ समाप्तेति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનસૂત્રોપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ -૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.


(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદલિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવનિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.

(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્ય સંચય.

# *Don't Miss it.*




મૂળકાર

## યોગીરાજ શ્રી આનંદઘનજી મહારાજ

પરિશીલનકાર

## આ. શ્રી કલ્યાણબોધિસૂરિજી

## સુકૃત સહયોગી

પ.પૂ.સા.
શ્રીવિશ્વપ્રભાશ્રીજી
મ.સા.ની પ્રેરણાથી

**સમુબા શ્રાવિકા**
**આરાધના ભવન**

ગોપીપુરા-સુરત

જ્ઞાનનિધિના સદ્વ્યયની
ભૂરિ ભૂરિ અનુમોદના.